संस्कृत-वार्ता:

01.04.2024

सायम् - 06:20

मुख्यवार्ता:

- प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् भारतं आगामि-दश वर्षेषु आर्थिक दृष्ट्या आत्मनिर्भरं कारयितुम् आवश्यकताऽस्ति येन देशे वैश्विक-परिस्थितिनाम् आधिक प्रभावं न भवेत्।
- दिल्ला: न्यायालयेन मद्यनीति-प्रवञ्चनायां धनशोधन-प्रकरणे च आम-आदमी-पार्टी-इति दलस्य नेतु: दिल्ल्या: मुख्यमन्त्रिण: अरविन्द-केजरीवाल-इत्यस्य न्यायिक-निगडनस्य अवधि: अस्य मासस्य पञ्चदश-दिनांक-पर्यन्तं वरीवर्धित:।
- निर्वाचनायोगेन महिला: विरूध्य अपमानकारि-टिप्पण्या: कृते भारतीय-जनता-पार्टी-इति दलस्य सांसद-दिलीप घोषस्य, कांग्रेस-दलस्य नेतु: सुप्रिया-श्रीनेत इत्यस्या: च निन्दा कृता अस्ति।
- केन्द्रीय-गृह-सचिवेन अजय कुमार भल्ला इति द्वारा नवीन-प्रौद्योगिक्या: उत्पद्यमानानि सुरक्षा-सम्बन्धि-भर्त्सनानि प्रति सम्बोधितम्।
- आईपीएल-क्रिकेट्-क्रीडायां- मुम्बई-नगरे वानखेड़े इति क्रीडांगणे मुम्बई इंडियन्स राजस्थान रॉयल्स इत्येतयो: दलयो: मध्ये अद्य सायं सार्धसप्त-वादने आरप्स्यते।

प्रधानमन्त्री

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् भारतं आगामि-दश वर्षेषु आर्थिक दृष्ट्या आत्मनिर्भरं कारयितुम् आवश्यकताऽस्ति येन देशे वैश्विक-परिस्थितिनाम् आधिक प्रभावं न भवेत्। प्रधानमन्त्रिणा भारतीय-रिजर्व-बैंक-इत्यस्य नवति वर्षाणां सम्पूर्त्यावसरे मुम्बई नगरे आयोजिते कार्यक्रमे उक्तं यत् भारतीय बैंकिंग इत्यस्मिन् क्षेत्रे महति-परिवर्तन कथमागतम् अस्मिन् शोधस्यावश्यकता वर्तते इति। सः अवदत् यत् विगतेषु दशवर्षेषु तस्य सर्वकारेण आरबीआई इत्यनेन गृहीत-निर्णयैः बैंकेति क्षेत्रं लाभप्रदं , ऋणवृद्धिः चाभवत्। सः अवदत् यत्, पीएसयू-बैङ्कानां पुनरुद्धाराय सर्वकारेण त्रीणि दसमलव पञ्च लक्षकोटिरूप्यकाणां निवेशं कृतम्। प्रधानमन्त्रिणा उक्तं यत्, एतासु सर्वासु उपलब्धिषु आरबीआई-इत्यस्य महती भूमिका अस्ति। प्रधानमन्त्री श्रीमोदी मुम्बईनगरस्य एकदिवसीय यात्रायां अस्ति। केन्द्रीयवित्तमन्त्री निर्मला सीतारमणः अपि कार्यक्रमे भागं गृहीतवती।

केजरीवाल-दिल्ली न्यायालय

दिल्ला: न्यायालयेन मद्यनीति-प्रवञ्चनायां धनशोधन-प्रकरणे च आम-आदमी-पार्टी-इति दलस्य नेतु: दिल्ल्या: मुख्यमन्त्रिण: अरविन्द-केजरीवाल-इत्यस्य न्यायिक-निगडनस्य अवधि: अस्य मासस्य पञ्चदश-दिनांक-पर्यन्तं वरीवर्धित:। अवधेयास्पदम् अस्ति यत् आप-इति दलस्य नेता अरविन्द केजरीवाल: मार्च-मासस्य एकविंशति-तिथौ प्रवर्तन-निदेशालय-द्वारा निगडित: आसीत्। राउस-एवेन्यु-न्यायालयस्य विशेष सी. बी. आई. न्यायाधीशेन कावेरी-बावेजाद्वारा अरविन्द-केजरीवालस्य-न्यायिक निगडनस्य अवधे: समाप्तौ अयम् आदेश: दत्त:। इत: प्राक् गतमासस्य द्वाविंशति दिनांके न्यायालयेन अरविन्द केजरीवालस्य षड्दिवसीय-न्यायिक-निगडनस्य कृते आदेश: प्रदत्त: य: अनन्तरं चतुर्णां दिवसानां कृते वर्धित: आसीत्।

प्रधानमन्त्री/कच्छथीवु

भाजपेति दलस्य वरिष्ठ नेत्रा प्रधानमन्त्रिणा नरेन्द्रमोदिना च अद्य कच्छथीवु-द्वीपविषये डीएमके इति-दलस्य आलोचनां कुर्वता आरोपितं यत् तमिलनाडोः-हितानां रक्षणाय दलेन किमपि न कृतम्। सामाजिकान्तर्जाले एकस्मिन् सन्देशे सः आरोपितवान् यत् कच्छथीवु-सन्दर्भे उद्भूताः नूतनाः विषयाः डीएमके इति-दलस्य विभिन्न विचाराणाम् अनावरणं कुर्वन्ति। चतुःसप्तत्यधिक-ऊनविंशति: शत तमे वर्षे भारत-श्रीलङ्का देशयोः मध्ये एकस्मिन् सन्धि प्रस्तावान्तर्गतं तत्कालीन-काङ्ग्रेस-सर्वकारस्य प्रधानमन्त्रिणा इन्दिरागान्धिना श्रीलङ्कादेशाय कच्छथीवु-द्वीपः प्रदत्तः आसीत्। प्रधानमन्त्री मोदी एकस्याः वार्ता-प्रतिवेदनस्य उल्लेखं कुर्वन् आसीत् यस्मिन् सुनिश्चितम् वर्तते यत् तत्कालीन-राज्यस्य मुख्यमन्त्री एम. करुणानिधिः अपि अस्मिन्-विषये चर्चायाः अनन्तरं तेषां समर्थनं कृतवान् आसीत्। तेषां निर्णयेन प्रमुखतया निर्धनमत्स्यजीविनां हितस्य हानि: अभवत्। अद्य प्रातः नवदिल्ल्यां वार्ताहरान् सम्बोधयता भाजपेति दलस्य नेत्रा विदेशमन्त्रिणा च डॉ. एस जयशंकरेण अपि अस्मिन् विषये डीएमके इत्यस्य उपरि आक्षेपं कृतम्। सः अवदत् यत् तमिलनाडू राज्यस्य शासनाधिरूढेन दलेन कच्छथीवु द्वीपं श्रीलङ्कादेशाय समर्पयितुं प्रश्नं करोति अपि च वदति यत् तस्मिन् समये तमिलनाडुसर्वकारेण सह परामर्शः नाभवत् परञ्च तथ्यं तु एतत् अस्ति यत् तस्मिन् विषये पूर्णतया सूचना आसीत्।

निर्वाचन आयोग

निर्वाचनायोगेन महिला: विरूध्य अपमानकारि-टिप्पण्या: कृते भारतीय-जनता-पार्टी-इति दलस्य सांसद-दिलीप घोषस्य, कांग्रेस-दलस्य नेतु: सुप्रिया-श्रीनेत इत्यस्या: च निन्दा कृता अस्ति। आयोगेन पश्चिम बंगाल-राज्यस्य मुख्यमन्त्रिणं ममता बनर्जी इत्येतां विरूध्य दिलीप-घोषेण कथित-वचनस्य निन्दा कुर्वता उक्तं यत् आदर्श-आचार-संहिता प्रवर्तिता अस्ति। एतदर्थं सार्वजनिकरूपेण भाषणं कुर्वन् सावहितम् भवितव्यम्। आयोग-द्वारा भारतीय जनता पार्टी इति दलस्य लोकसभा-प्रत्याशिनीं कंगना रनौत इत्येमां विरूध्य अपमानकारि-टिप्पण्यर्थं कांग्रेस-दलस्य नेतु: सुप्रिया-श्रीनेत इत्यस्या: अपि भर्त्सनं कृतम्। आयोगेन स्वकीयस्य एकस्मिन् आदेशे प्रतिपादितं यत् द्वाभ्याम् नेतृभ्याम् अनेन कृत्येन आदर्श-आचार-संहिताया: उपबन्धानाम् उल्लंघनं कृतम् अस्ति।

बीजेपी-राहुल गांधी

भाजपा-इति दलेन कांग्रेस दलस्य नेतु राहुल-गान्धिन: विरूध्य निर्वाचन-आयोगे परिवाद: प्रस्तुत:। कांग्रेस दल नेत्रा राहुल-गान्धिद्वारा लोकसभा निर्वाचने भाजपा दल द्वारा शासकीय-संस्थानां दुरूपयोगस्य आक्षेपा: कृता: सन्ति।

भाजपा-घोषणापत्रस्य सभा:

भाजपेति दलस्य निर्वाचन-घोषणा-पत्र-समितेः उपवेशनम् अद्य नवदिल्ल्यां भाजपा मुख्यालये अभवत्। तदनन्तरं लोकसभानिर्वाचनाय दलस्य घोषणापत्रस्य विषये समितिः विचारं कृतवती। भाजपेति दलस्य वरिष्ठनेतुः केन्द्रीयमन्त्रिणः च राजनाथसिंहस्य नेतृत्वे सप्तविंशतिः सदस्यीयात्मिका समित्याः प्रथमा सभा आसीत्। दलस्य वरिष्ठनेत्री तथा केन्द्रीयमन्त्री निर्मला सीतारामन: संयोजिका, दलस्य नेता पीयूषगोयलः सहसंयोजकः च अस्ति। अपरत्र तेलङ्गानायां लोकसभानिर्वाचनाय अभ्यर्थीनां नामनिर्णयार्थं काङ्ग्रेसदलस्य

केन्द्रीयनिर्वाचनसमित्याः अपि उपवेशनं नवदिल्ल्यां आयोजितम्। दलाध्यक्ष: मल्लिकार्जुन खडगे, दलस्य वरिष्ठनेत्री सोनिया-गांधी, तेलंगानायाः मुख्यमंत्री रेवंत रेड्डी इत्यादयः च सभायां उपस्थिताः आसन्।

## ओडिशा-स्थापना दिवस

ओडिशा इति राज्य द्वारा अद्य राज्यस्य स्थापना दिवस: परिपाल्यते। राष्ट्रपति द्रौपदी मुर्मु:, उप-राष्ट्रपति: जगदीप-धनखड़:, प्रधानमन्त्री नरेन्द्र मोदी च अस्मिन्नवसरे जनान् शुभकामना: दत्तवन्त:। सामाजिक-संचार-पटले राष्ट्रपति: उक्तवान् यत् ओडिशा स्वकीय-विशाल-प्राकृतिक-संसाधनाय, समृद्ध-सांस्कृतिक-न्यासाय च ज्ञायते।

## गृह-सचिव:

केन्द्रीय-गृह-सचिवेन अजय कुमार भल्ला इति द्वारा नवीन-प्रौद्योगिक्या: उत्पद्यमानानि सुरक्षा-सम्बन्धि-भर्त्सनानि प्रति सम्बोधितम्। अद्य नव दिल्ल्यां नागरिक उड्डयन-सेवा-प्रशासनम् (BCAS) इत्यस्य अष्टत्रिंशत्तमे स्थापना दिवसावसरे एकं जनसमूहं सम्बोधयन् स: एतान् विचारान् प्रकटितवान्। स: कथितवान् यत् कृत्रिम-मेधा, A-I इति सार्वलौकिक-स्थानानिर्धारिक-प्रणाली-G.P.S. इत्याद्य: प्रणाल्य: साङ्गणिक-सुरक्षा- कृते अतिबाधका: सन्ति। तेन बाधकानां निवारणाय समवेत-प्रयत्ने विशिष्ट-बलं प्रदत्तम्।

## आईपीएल

आईपीएल इति -क्रिकेट्-स्पर्धा-मालिकायां-मुम्बई-नगरस्य वानखेड़े इति क्रीडांगणे मुम्बई इंडियन्स राजस्थान रॉयल्स इत्येतयो: दलयो: मध्ये अद्य सायं सार्धसप्त-वादने आरप्स्यते।

इति वार्ता: ।।